# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रितृतीयवर्षम् (SEM-6) **प्रश्नपत्रम् –** ०६ **गुणाः -** ७०

**विषयः** - साहित्यम् **( C.**C. 3.6.1.2. ) **समयः -** ११ तः ०२

**दिनाङ्कः** - ०४/०४/२०१९ **सन्दर्भग्रन्थः –** किरातार्जुनीयम् – प्रथमः सर्गः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः १** निम्नाङ्कितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत । १०

१.क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥

२. तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥

३. निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥

प्रश्नः २ कयोश्चिदेकस्य निबन्धात्मकमुत्तरं लिखत । १०

१.महाकवेः भारवेः काव्यकलायाः समीक्षां कुरुत ।

२.ग्रन्थकर्तुः परिचयं लिखत ।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः ३ निम्नेषु द्वयोः ससन्दर्भं व्याख्यां लिखत ।** १०

(१)अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ॥

(२)प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥

(३) निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥

प्रश्नः ४ एकस्य सविस्तरमुत्तरं लिखत । १०

१. किरातार्जुनीयस्य महाकाव्यत्वं प्रतीपादनीयम् ।

२. भारवेः कालनिर्धारण कुरुत ।

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः ५ निम्नाङ्कितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१) अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥

२) विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥

३) न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोमधि सन्धिदूषणानि ॥

**प्रश्नः ६** एकस्य सविस्तरमुत्तरं लिखत । **१०**

१. ग्रन्थानुसारं दुर्योधनशासनवर्णनं लिखत ।

२. वनेचरः एवं युधिष्ठिरः, उभयोः संवादं लिखत ।

## अन्वितयः १ – ३ (Units 1 – 3)

**प्रश्नः ७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तरं लिखत ।** **१०**

१) ग्रन्थकर्तुः नाम किम् ?

२) 'किरातार्जुनीयम्' कीदृशं काव्यम् ?

३) प्रथमसर्गे कति श्लोकाः सन्ति ?

४) वरं विरोधोऽपि समं महात्मभिः कस्य उक्तिः ?

५) किरातार्जुनीये कः नायकः ?

६) किरातार्जुनीये कः प्रतिनायकः ?

७) किरातार्जुनीयमहाकाव्ये कः प्रधानरसः ?

८) विधिसमयतियोगाद्..। इति सर्गस्य अन्तिमपद्ये किं छन्दः अस्ति ?

९) प्रथमसर्गे कतिछन्दसां उपयोगः भवति ?

१०) 'हितं मनोहारि च दुर्लभं वचः' इति कः उक्तवान् ?

११)वृकोदरः अर्थात् कः ?

१२) मानधनाः शब्दस्य कोऽर्थः ?

१३) श्रियः इति अत्र का विभक्तिः ?

१४) महीभुजः शब्दस्य कोऽर्थः ?

१५) प्रवक्तुं कस्य कृदन्तस्य पदं वर्तते ?

*****************